# Gandharvasutanduprabhritibhih Shivaradhanam

# ગન્ધર્વસુતણ્ડુપ્રભૃતિભિઃ શિવારાધનમ્

## Document Information

Text title : Gandharvasutanduprabhritibhih Shivaradhanam

File name : gandharvasutaNDuprabhRRitibhiHshivArAdhanaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shivAkhyaH chaturthAMshaH | adhyAyaH 35 | 1-37||

Latest update : August 20, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# ગન્ધર્વસુતણ્ડુપ્રભૃતિભિઃ શિવારાધનમ્

સ્કન્દઃ -
વિશ્વાવસુશ્ચ ગન્ધર્વો ગાનાચાર્યોઽભવત્ પુરા ।
ગાનબન્ધુઃ સુબન્ધુશ્ચ તથા નારદપર્વતૌ ॥ ૧॥

હાહાહૂહૂ મહાદેવં ચિરં ચિરગિરીશ્વરં
ભસ્મચિન્હોઽર્ચયામાસ ગાનસ્તુત્યાભિતોષયન્ ।
રુદ્રવીણાપાણપસ્તે શિવનામ્નાં સુગાયનૈઃ ॥ ૨॥

- -

ગન્ધર્વાઃ -
દક્ષશિક્ષવિષમાક્ષમનુક્ષં (?) ઉક્ષવાહમરવિન્દદલાક્ષમ્ ।
મોક્ષદાયકસુમક્ષરક્ષિતં કાલકૂટગરલાત્કિલ દેવાન્ (?) ॥ ૩॥

- -

વસવો બ્રહ્મણા શપ્તાસ્તેઽપિ ગોપર્વતેશ્વરમ્ ।
સમારાધ્યૈવ મુક્તાઃ સ્યુઃ સ્તુવન્તઃ પશુપં શિવમ્ ॥

- -

વસવઃ -
શમ્ભો પાહિ દયામ્બુધે ગતમયં સંસારપારઙ્ગતઃ
    ત્વત્પાદામ્બુરુહાર્ચનેન ભગવન્ વિશ્વેશ વિશ્વાધિક ।
રાજત્પિઙ્ગજટાત્તસઙ્ગ સુમહાધામેન્દુચુડામણે
    ગઙ્ગાગર્વહરાવ્યયેશ્વર મહાદેવેશ રક્ષાધુના ॥ ૫॥

- -

તણ્ડુરિન્દુશકલામલમૌલેરિન્દુખણ્ડમહશોરુકપાલમ્ ।
ભસ્મપુણ્ડ્રનિટિલો ભરિતાશો વીક્ષ્ય નમ્રશિરસા ગણવર્યઃ ॥ ૬॥

શર્વપાદકલનેન સર્વદા પાપપર્વતવરૈર્ન બિભેતિ ।

ઇન્દુચૂડ ચરણામ્બુજસઙ્ગોઽપ્યન્તરઙ્ગકરણે ગણવર્યઃ ॥ ૭॥

- -

તણ્ડુઃ -

ગરધર ગિરિવરશય પુરહર મુરહરશરકર કુરુ કરુણામ્ ।

સુમશરદેહવિનાશક ઈશ્વર નરહરિકૃત્તિવસાન મહેશ ॥ ૮॥

- -

અશ્વિનૌ પુરા દેવૈર્નિરસ્તૌ ભિષજાવિતિ ।

શ્રીકણ્ઠેશં સમારાધ્યાભવતાં સોમભાગિનૌ ॥ ૯॥

- -

અશ્વિનૌ -

કુન્દબૃન્દનિભદેહ ઇન્દુધૃઙ્મન્દરાદ્રિવસતેશ્વર પાહિ ।

ઇન્દુશક્તિવરહાર ઇન્દિરાનાથપૂજ્યપદપદ્મ સુન્દર ॥ ૧૦॥

ઇન્દ્રેણ નિકૃતાઃ સર્વે મરુતો હિ મહૌજપઃ ।

ઇન્દ્રેણાપ્યલભંસ્તે વૈ સોમભાગં શિવાર્ચયા ॥ ૧૧॥

- -

તૃણજ્યોતિ સમારાધ્ય સ્તુત્યેશસ્ય કૃપાવશાત્ ॥ ૧૨॥

- -

મરુતઃ -

યઃ કાલકાલમનિલાશનશોભિગાત્રં રુદ્રં ત્રિનેત્રમયરાજસુતાર્ધગાત્રમ્ ।

મિત્રિકૃતાબ્જહૃદયોરુવિકાસમિત્રં મન્ત્રી ચ યન્ત્રિતભવો ભવતીહ ભાવઃ ॥ ૧૩॥

- -

આદિત્યાશ્ચાપિ તપસા સમારાધ્ય મહેશ્વરમ્ ।

સહ્યજાતીરલિઙ્ગેષુ તુઙ્ગેષુ નિયતં સદા ॥ ૧૪॥

ધૃતેશે પુષ્પનાથે ચ પ્રણતેશે તુ વૈદ્યકે ।

શ્રીખણ્ડે તૃણજક્ષેત્રે વેદિકાખ્યે પ્રયાણકે ॥ ૧૫॥

જમ્બુલિઙ્ગે માતૃશૈલે રત્નશૈલ ઇરાવૃતે ।

સ્તુતવન્તો દીપ્તનવોઽભવંસ્તે શઙ્કરાર્ચનાત્ ॥ ૧૬॥

- -

આદિત્યાઃ -

યશ્ચન્દ્રચૂડચરણામ્બુજસેવનેન કાલં નયેત્સ હિ ભવેત્સુગુણાલબાલઃ ।
વ્યાલેન્દ્રમાલગરલાશનરૂપમાપ્ય કૈલાસમૌલિષુ સદા વિહરત્યજસ્રમ્ ॥ ૧૭॥

- -

રુદ્રાયૈકાદશ પુરા સમારાધ્ય મહેશ્વરમ્ ।
રુદ્રસ રૂપ્યમાપન્નાઃ શઙ્કરસ્ય પ્રસાદતઃ ॥ ૧૮॥

દુર્ગેશે ક્ષીરિણીક્ષેત્રે માધવ્યાં સુન્દરે વને ।
તેજિનીવિપિને કોટૌ મઙ્ગલે દક્ષિણાવૃતે ॥ ૧૯॥

વૈદ્યનાથે વિધિવને કાલનાશેઽમ્બિકેશ્વરે ।
સ્તુવન્તઃ પરમાં કાષ્ઠાં તે સર્વે રુદ્રમૂર્તયઃ ॥ ૨૦॥

- -

રુદ્રાઃ -

યસ્માત્પરં ન પરમસ્તિ સુરાદિસઙ્ઘમોઘાઘસઙ્ગજભયં ન ભવેદ્ધિ તસ્ય ।
યસ્યાર્ચનેન કલિમુક્તિપદાભિપઙ્ગઃ શાઙ્ગસ્ય લિઙ્ગવિહિતામલપૂજકસ્ય ॥ ૨૧॥

રુદ્રાક્ષભસ્મકલિતામલકાલકણ્ઠ કુણ્ઠીકૃતાઘનિચયઃ સ તુ નીલકણ્ઠઃ ।
વૈકુણ્ઠપૂજિતપદામ્બુજશીલનેન પાઠીનસધ્વજકૃતાં ન રુજં વહેત ॥ ૨૨॥

- -

પિતરશ્ચ તથાન્યેષુ તત્ર સહ્યોદ્ભવાતટે ।
લિઙ્ગેષુ પૂજયામાસુઃ સ્તુવન્તઃ સામ્બમીશ્વરમ્ ॥ ૨૩॥

- -

પિતરઃ -

મુકુટતટનિબદ્ધ (?) સોમધામોરુલિઙ્ગસ્ફુટ પરિચયપૂજાધ્યાનતો મુક્તિકાન્તામ્ ।
કલયતિ સુકૃતાનાં રાશિરીશપ્રસાદાદનુદિનગલિતાઘઃ શામ્ભવઃ શમ્ભુભક્તઃ ॥ ૨૪॥

- -

ગ્રહાદ્યા ઋષયશ્ચેમે મુનયોઽન્યે પિનાકિનમ્ ।
સમભ્યર્ચ્ય સ્તુવન્તસ્તે લેભિરે વાઞ્છિતાનિ હિ ॥

કુમ્ભઘોણે તથા ભાનુઃ ચન્દ્રો મધ્યાર્જુનાહ્વયે ।
મઙ્ગલૈશ્ચા માયૂરે બુધઃ શ્વેતાટવીતટે ॥ ૨૬॥

છાયાવને ગુરુર્દેવં શ્રીવાઞ્છ્યાં ભૃગુરીશ્વરમ્ ।
મન્દોઽપિ કમલાપુર્યાં કેતુર્દેવવને શિવમ્ ॥ ૨૭॥

રાહુર્વાતપુરીનાથં ધ્રુવો વૈ સેતુબન્ધને ।
તથાન્યે મુનયઃ પૂર્વં ભૂતભવ્યાઃ સનાતનાઃ ॥ ૨૮॥

તત્રૈવ પૂજયામાસુશ્ચતુર્દશસુ સત્તમાઃ ।
સ્તુવન્તઃ સામ્બમીશાનં લેભિરે વાઞ્છિતાનિ હિ ॥ ૨૯॥

- -

ગ્રહાદયઃ -
જય જય મહાભૈરવ મહાભૂતભૂષિમૂલ કુણ્ડલિકુણ્ડલાલઙ્કૃત
અતિધનવિલસિતવિદ્યુદતિચલદુરુતરકરવાલ નિખિલનિગમોપગીયમાન
સૂકરકર નિકરપરિચયચતુરવિરચિતચતુરશૃઙ્ગાર-
કરકમલકલિતકપાલ સરસિજાસનવિસ્તારિતસમસ્તવ્યસ્તસમસ્તજગ-
દ્વિસ્તરસંહારસન્નદ્ધનિર્ગણનિરવધિકપરિમાણનીહારપરિવાર-
મરીચિવીચ્યપારસાગરપત્નીજલલુલિતજટાજૂટાભિરામ હર દુરિતહર
અપરાઙ્ગનાભોગ સરાગપતઙ્ગભઙ્ગ્યવિતતોત્તમાઙ્ગ ભ્રૂમધ્યનયન-
મદનદમન મત્તમધુકરઝઙ્કારસઙ્કાશનિજશૃઙ્ગ
સંસરણકિઙ્કિણીક્વણિતલલિત પદાહતિલીનમહીમણ્ડલાધારાણ્ડજ-
પ્રસ્તૂયમાનતાણ્ડવાડમ્બરયુક્તારોત્કર્ષ ધ્વસ્તદૈત્યદાનવ-
સઙ્ઘાતનિરન્તરાતિરિત (?) શાન્તાન્તઃકરણ અનવરત-
ધારાધરધ્વાનગમ્ભીરઘર્ઘરગલગવયફૂત્કારસન્નિભગહરગુહારાજી
વિરાજમાનધરાધરાધીશકન્યાકાન્તિસઙ્ક્રાન્તનિજકલેવરૈકદેશ
અખિલજગત્યધીશ મહેશ નમસ્તે નમસ્તે ॥ ૩૦॥

આદૌ કર્મવશાદુદશ્ચદખિલત્રૈલોક્યમૂલાઙ્કુરં
પઞ્ચોત્પલ્લવિતોરઙ્ગવિભવશ્રેણીસમુન્મેખલમ્ ।
અન્તે લોચનમુદ્રણાવિઘટનાભઙ્ગિ પ્રગલ્ભં મહો
ભાલેલોચનમાવિરસ્તુ પુરતઃ સંસારમમ્મોહનમ્ ॥ ૩૧॥

આધારં ચતુરાનનસ્ય કરકાસન્નદ્ધપાથઃસ્રુતેરાધેયં
ગિરિકન્યકાકુચતટાભોગસ્ય ભઙ્ગ્યાકૃતેઃ ।
આશાપાલકમૂલપાલમખિલબ્રહ્માણ્ડભાણ્ડસ્થિતેરા-
શાપાશવિમોચનાય પ્રણમામાન્તર્મનસ્તન્મહઃ ॥ ૩૨॥

- -

સૂતઃ -

એવં લિઙ્ગેષુ તુઙ્ગેષ્વમરવરમહામાતરો દેવસઙ્ઘા
    રક્ષોયક્ષાધિનાથા મનુમુનય ઇભે સહ્યજાપુણ્યતીરે ।
સમ્પૂજ્ય પ્રમથાધિનાથમનલાલઙ્કુરફાલાક્ષકં
    કાઙ્ક્ષામાપુરતીવ તુષ્ટહૃદયાઃ શમ્ભોઃ કટાક્ષાઙ્કુરૈઃ ॥ ૩૩॥

યલ્લિઙ્ગાર્ચનમાત્રતોઽખિલમહાસામ્રાજ્યમાપ્યાત્ર વૈ
    અન્તે મુક્તિમવાપ્નુવન્તિ નિયતં ભક્ત્યૈવ શમ્ભોઃ પદે ।
દેવે દેવાપિ(?)મોદામદમુદિતધિયઃ શાન્તસંસારરાગા
    રોગાપાયૈર્વિમુક્તા ધૃતભસિવસિતપ્રેમરુદ્રાક્ષસઙ્ગાઃ ॥ ૩૪॥

એવં તેઽમિહિતો હરાંશમહિમા હારેષુ સંહારકૃત્
    પાપાનાં શ્રુતિવીક્ષણોત્તમમહાહારાર્ચકેષુ ધ્રુવમ્ ।
શ્રુત્વાખ્યાનમુમાપતિપ્રિયમહાભક્તાભિપુણ્યાર્થદં
    ચાખ્યાનં શ્રુતિશેખરોત્તમપદૈઃ શ્રુત્વૈવ તુષ્ટો ભવ ॥ ૩૫॥

પુણ્યૈઃ પરં શિવરહસ્યમધુ પ્રકૃષ્ટ-
    મીશાસ્યપઙ્કજવરાત્ પરિનિઃસૃતં યત્ ।
પેપીય ષડ્વદનષટ્ચરણાત્ સુગન્ધિ
    સન્યસ્યતિ પ્રકથયન્ગણવિપ્રસઙ્ઘે ॥ ૩૬॥

શ્રુત્વેદં પુરુષાર્થસારનિગમોપાત્તં પ્રકૃષ્ટાર્થદં
    ભક્ત્યાખ્યાનમનોહરં વરચતુર્થાંશં રહસ્યં શિવમ્ ।
સમ્પ્રાપ્નોતિ ગણેન્દ્રમુખ્યપદવીં કિં કામનાભિઃ પરં
    નામ્ના શઙ્કરનામકોઽયમતુલો ભક્ત્યામૃણોદ્યો નરઃ ॥ ૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવાખ્યે ગન્ધર્વસુતણ્ડુપ્રભૃતિભિઃ શિવારાધનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શિવાખ્યઃ ચતુર્થાંશઃ । અધ્યાયઃ ૩૫ । ૧-૩૭॥

- .. shrIshivarahasyam . shivAkhyaH chaturthAMshaH . adhyAyaH 35 . 1-37..

Notes: Skanda સ્કન્દ and Sūta સૂત narrate; that Śiva શિવ is severally worshiped and eulogized at various Śiva Kṣetra-s શિવ kShetra by Gandharvā-s ગન્ધર્વાઃ, Viśvavasu વિશ્વવસુ, Taṇḍu તણ્ડુ, Aśvina twins અશ્વિનૌ, Maruta મરુત, Ādityā-s આદિત્યાઃ, Ekādaśa (11) Rudrā-s એકાદશ રુદ્રાઃ, Pitṛ-s પિતૃ, Navagraha નવગ્રહ. In this Chapter 35 અધ્યાયઃ ૩૫, that concludes the 4th Aṃśa

ચતુર્થાંશઃ of Śiva-Rahasyam શિવરહસ્યમ્, Sūta સૂત outlines the merit of listening and learning from the same.

Proofread by Ruma Dewan

*Gandharvasutanduprabhritibhih Shivaradhanam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*